पादौ रक्षतु गोविन्दो जङ्घे पातु त्रिविक्रमः ।
ऊरू(ममा)च्युतो रक्ष(क्षेत) गुह्यं रक्षतु माधवः ॥

**End:**

विष्णुपञ्जरसंयुक्तो विचरेच्च महीपतिः ।
राजद्वारे बिलद्वारे प्रदेशे भूतसङ्कुले ॥

* * * *

अपुत्रो लभते पुत्रं धनहीनो लभेद्धनम् ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

**Colophon :**

इति ब्रह्माण्डपुराणे त्रिपुरदहनकाले पार्वतीपरमेश्वरसंवादे श्रीविष्णुपञ्जरस्तोत्रं सम्पूर्णम् ॥

---

No. 7238. विष्णुपञ्जरमन्त्रः.

VIṢṆUPAÑJARAMANTRAḤ.

Pages, 2. Lines, 21 on a page.

Begins on fol. 10*a* of the MS. described under No. 2373, wherein it has been omitted to be included in the list of other works given therein.

Complete.

Similar to the above.

**Beginning :**

पादौ मे पातु गोविन्दः जङ्घे चापि त्रिविक्रमः ।
ऊरू च केशवो रक्षेत् कटिं चैव जनार्दनः ॥
नाभिं तु भार्गवो रक्षेत् गुह्यं रक्षतु वामनः ।

**End :**

सन्नुतं सर्वगात्रेषु प्रविष्टो विष्णुपञ्जरम् ॥
पञ्जरश्च प्रविष्टोऽभूत् विचरामि महीतले ।
नदीतटे महारण्ये चोरव्याघ्रभयेषु च ॥
डाकिनीभूतवेताले भयं नास्ति कदाचन ।
रोगार्तो मुच्यते रोगात् स नरश्श्रियमाप्नुयात् ॥

---

No. 7239. विष्णुपञ्जरमन्त्रः.

VIṢṆUPAÑJARAMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 2190, wherein it is given as Viṣṇupañjarakavaca.

Complete.

Same as the work described under number 6473.

## No. 7240. विष्णुमन्त्रः—न्याससहितः.

### VIṢṆUMANTRAḤ WITH NYĀSA.

Pages, 5. Lines, 21 on a page.

Begins on fol. 8*a* of the MS. described under No. 2373, wherein it has been omitted to be included in the list of other works.

Complete.

This Mantra is addressed to Viṣṇu. Preliminary to the repetition of this Mantra, the touching of the various parts of one's body, repeating the several names of Viṣṇu, is enjoined.

**Beginning:**

अव्यग्रचित्तः कुर्वीत न्यासकर्म यथाविधि ।
करन्यासं पुरा कृत्वा ततोऽङ्गन्यासमाचरेत् ॥
अङ्गुष्ठाग्रे तु गोविन्दं तर्जन्यां तु महीधरम् ।
मध्यमायां हृषीकेशमनामिक्यां त्रिविक्रमम् ॥

**End:**

मनुः—
ओं नमो विष्णवे केशवाय सर्वक्लेशापहर्त्रे नमः ॥
अष्टोत्तरं वा सहस्रं वा जपं कुर्यात् ।
यथोपचारान् कृत्वा एवं न्यासविधिं कृत्वा साक्षान्नारायणो भवेत् ॥

---

## No. 7241. विष्णुषडक्षरमन्त्रः.

### VIṢṆUṢAḌAKṢARAMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 7*b* of the MS described under No. 5786.

Complete.

The repetition of this Mantra consisting of six syllables is intended to secure the favour of Viṣṇu.

**Beginning :**

अथ विष्णुषडक्षरमन्त्रः—

ओं विष्णवे नमः इति प्राणायामः १२.

* * * *

अस्य श्रीविष्णुषडक्षरमन्त्रस्य अन्तर्यामी ऋषिः, देवी गायत्री छन्दः, श्रीविष्णुर्देवता ; श्रीविष्णुप्रेरणया श्रीविष्णुप्रीत्यर्थे श्रीविष्णुषडक्षरमन्त्रजपे विनियोगः ।

**End :**

ओं विष्णवे नमः—इति जपः । उपसंहारः पूर्ववत् ॥

**Colophon :**

इत्यष्टमहामन्त्रजपः सम्पूर्णः ॥

---

No. **7242.** विष्णुषडक्षरमन्त्रः.

VIṢṆUṢAḌAKṢARAMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 37*a* of the MS. described under No. 3056.

Complete.

Similar to the above.

**Beginning :**

अस्य श्रीविष्णुषडक्षरमहामन्त्रस्य ब्रह्मा ऋषिः, देवी गायत्री छन्दः, श्रीमहाविष्णुर्देवता ; ओं बीजं, नमश्शक्तिः, श्रीं कीलकं, श्रीविष्णुप्रसादसिद्ध्यर्थे जपे विनियोगः ।

**End :**

सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षस्स्थलकौस्तुभश्रियं नमामि विष्णुं शिरसा चतुर्भुजम् ॥

मन्त्रः—
ओं नमो विष्णवे ॥

No. 7243. विष्णुषडक्षरमन्त्रः.
VIṢṆUṢAḌAKṢARAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 12*a* of the MS. described under No. 3546, wherein it is given as Viṣṇuṣaḍakṣarīmantranyāsa.

Complete.

Similar to the above.

**Beginning:**

अस्य श्रीविष्णुषडक्षरमहामन्त्रस्य ब्रह्माद्याःसनकाद्या ऋषयः, दैवी गायत्री छन्दः, परमात्मा देवता ; अं बीजं, उं शक्तिः, मं कीलकं, श्रीमहाविष्णुप्रीत्यर्थे जपे विनियोगः ।

**End:**

विष्णुं श्यामलचन्द्रकोटिसदृशं शङ्खं रथाङ्गं गदा-
मम्भोजं दधतं सिताब्जनिलयं कान्त्या जगन्मोहनम् ।
आबद्धाङ्गदहारमौक्तिकरमाशोभास्फुरद्वक्षसं
श्रीवत्साङ्कमुदारकौस्तुभधरं वन्दे मुनीन्द्रावृतम् ॥
ओं ॥

No. 7244. विष्णुसूक्तमन्त्रः.
VIṢṆUSŪKTAMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 15*b* of the MS. described under No. 5786.

Complete.

This Mantra in is in praise of Viṣṇu. It consists of 6 Ṛks in the 154th Sūkta of the 1st Maṇḍala of the Ṛgvēda.

**Beginning:**

ओं विष्णवे नमः ओं इति प्राणायामः (१२).
पूर्णज्ञानेत्यादिन्यासः ।

अस्य श्रीविष्णुसूक्तमहामन्त्रस्य दीर्घतमा ऋषिः, त्रिष्टुप् छन्दः, श्रीविष्णुर्देवता ; श्रीविष्णुप्रेरणया विष्णुप्रीत्यर्थे विष्णुषडर्चसूक्तमहामन्त्र-जपे विनियोगः ।

**End :**

यत्र गावो भूरिशृङ्गा अयासः । अत्राह तदुरुगायस्य वृष्णः ।
परमं पदमवभाति भूरि—इत्यन्तं जपः । उपसंहारः पूर्ववत् ॥

---

## No. 7245. विष्णुसूक्तमन्त्रः.

## VIṢṆUSŪKTAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 16*a* of the MS. described under No. 5786, wherein it has been omitted to be included in the list of other works given therein.

Complete.

The Mantra here consists of 6 Ṛks in the 154th, 6 Ṛks in the 155th, and 5 Ṛks in the 156th Sūkta of the 1st Maṇḍala of the Ṛgvēda.

**Beginning :**

अथवा विष्णोर्नुकमित्यारभ्य ऋतस्य भागे यजमानमाभजत् इत्यन्तं वर्गत्रयात्मकम् ।

**End :**

द्वितीयस्य जगती छन्दः । उपसंहारः पूर्ववत् ॥

---

## No. 7246. विसर्गमातृकान्यासः.

## VISARGAMĀTṚKĀNYĀSAḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 193*a* of the MS. described under No. 124, wherein it is found in Daśavidhamātṛkanyāsa 192*a* in the list of other works.

Complete.

On the ceremonial touching of certain parts of the body while uttering the series of Mantra-formulas obtained by introducing the

successive letters of the alphabet followed by Visarga between the words ओं and नमः.

**Beginning:**

अथ विसर्ग[बिन्दु]मातृकान्यासः —

अस्य श्रीविसर्गमातृकान्यासमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीविसर्गमातृका सरस्वती देवता; व्यञ्जनानि बीजानि, स्वरास्शक्तयः, व्यक्तयः कीलकं, विसर्गमातृकान्यासे विनियोगः।

**End:**

ओं अः नम इति क्षान्तं न्यसेत् ॥

**Colophon:**

इति विसर्गमातृकान्यासः ॥

---

## No. 7247. विसर्गमातृकासरस्वतीमन्त्रः.

## VISARGAMĀTṚKĀSARASVATĪMANTRAḤ.

**Page, 1. Lines, 4 on a page.**

Begins on fol. 139*a* of the MS. described under No. 537. The other works therein referred to are Dēvīmāhātmya 1*a*, Kātyāyanītantra 57*b*, Lalitāṣṭōttaraśatanāman 64*a*, Tripurasundarītattvavidyāmantrasahasranāman 66*a*, Śūlinīmantra 75*a*, Pratikriyāstōtra 75*a*, Dēvīsūktamālāmantra 78*b*, Mahālakṣmīpūjā 80*b*, Pañcasiṁhāsanēśvarī (with Sūkta) 84*a*, Mahātripurasundarī, mantrasēṣa 87*b*, Śrīvidyāratnasūtra 90*a*, Śaktipratyaṅgirāmālāmantra 93*a*, Bālāsahasranāman 97*a*, Bagalāmukhīstōtra 103*a*, Bhuvanēśvarīstōtra 106*a*, Āsurīmantra 107*b*, Lalitātriśati 109*a*, Rājyalakṣmīstōtra 112*a*, Gurupādukāmantra 113*a*, 135*b* and 144*a*, Prāsādaparāparāprāsādamantra 115*a*, Dēvīpūjāvidhāna 118*a*, Bālātripurasundarīmantra 130*b*, 145*b* and 222*a*, Bagalāmukhīpūjāvidhāna 131*b*, Vārāhīmantra 135*a* and 244*a*, Mahāpādukāmantra 135*a*, Pārvatīmantra 135*a*, Kālikāmantra 138*a*, Sāmbadakṣiṇāmūrtimantra 136*b*, Rājarājēśvarīmahātripurasundarīmantra 137*a*, Āpaduddhāraṇavaṭukabhairavamantra 137*b*, Śuddhamātṛkāsarasvatī 138*b*, Bindumātṛkāsarasvatī 138*b*, Hṛllēkhāsarasvatī

139*a*, Yukiamātṛkāsarasvatī 139*b*, Bālāsampuṭitamātṛkāsarasvatī 139*b*, Parāsampuṭitamātṛkāsarasvatī 140*a*, Vidyāsampuṭitamātṛkāsarasvatī 140*b*, Ajapāmātṛkāsarasvatī 140*b*, Paraprāsādamantra 141*b*, Ajapāgāyatrī 142*a* and 250*a*, Pañcamayāgavidhi 145*b*, Dīpinīmantra 156*a*, Dēvīmālāmantra 156*b*, Ucchiṣṭagaṇapatimantra 158*a*, Mēdhādakṣiṇāmūrtimantra 158*a* and 167*a*, Śrīvidyāmantra 159*a*, Prāṇapratiṣṭhā 160 and 244*a*, Antarmātṛkāsarasvatī 160*b*, Bahirmātṛkāsarasvatī 161*a*, Kuṅkumamātṛkāsarasvatī 162*b*, Mahāgaṇapatimantra 163*b* and 168*a*, Bagalāmukhīmālāmantra 163*b*, Tiraskariṇīmantra 164*b*, Tārakabrahmamantra 165*a*, Cintāmaṇisarasvatī 165*a*, Mahālakṣmīmantra 165*b*, Bhuvanēśvarī mantra 165*b*, Tvaritāpārvatīmantra 166*b*, Śābaramantra (Hindustānī) 169*a*, Lalitāsahasranāmamahiman 170*a*, Dakṣiṇāmūrtikavaca 173*a*, Dakṣiṇāmūrtyaṣṭaka 175*a*, Dakṣiṇāmūrtiyantra 176*a*, Dakṣiṇāmūrtyupaniṣad 176*b*, Nīlakaṇṭhabaḍabānala 179*a*, Bhairavamālāmantra 179*b*, Indrākṣistōtramantra 181 and 183*a*, Indrākṣiyantra 182*a* and 183*b*, Dakṣiṇāmūrtyaṣṭōttaraśatanāman 185*a*, Caraṇavyūha 187*a*, Śarabhasāluvadvātriṁśadakṣarīmantra 191*a*, Śarabhasāluvamantrarājamahāmantra 191*a* and 191*b*, Śarabhasāluvamālāmantra 192*a*, Śarabhacitkalākarṣaṇamālāmantra 192*b*, Śarabhasāluvapakṣirājamālāmantra 194*a*, Śarabhamālāmantra 195*a*, Dakṣiṇāmūrtivyākhyā 196*a*, Vīraśarabhasāluvamantra 211*a*, Sudarśanamālāmantra 212*a*, Narasiṁhamālāmantra 212*b*, Pañcavaktrahanumatstōtramantra 213*b*, Hanumadbaḍabānalamantra 215*a*, Vīrabhadrakavaca 216*a*, Hanumanmantra 219*a*, Aghōrāstramantra 220*b*, Svarṇākarṣaṇabhairavamantra 221*a*, Saṁvicchūlinīmantra 224*b*, Garuḍapañcāśat 224*b*, Brahmasudarśanamantra 226*a*, Sudarśanakavaca 227*a*, Baḍabānalasudarśana 231*b*, Aghōrasudarśana 232*b*, Nṛsiṁhasahasrākṣarī 234*a*, Sudarśanamālāmantra 234*a* and 237*a*, Hanumanmālāmantra 239*b*, 240*b* and 243*a*, Śrīrāmastōtra 241*a*, Piṇḍapiśācī 245*a*, Bālākavaca 246*a*, Bālāhṛdaya 247*a*, Bālāmālāmantra 248*a*, Bālāstavarāja 248*b*, Gāyatrīrāmāyaṇa 254*a*, Ṣōḍaśanāmadhyāna 256*a*, Śivavēdapādastava 260*a*, Dakṣiṇāmūrtyaṣṭaka 268*a* and *b*, Vīraśarabhamālāmantra 271*a*, Bhasmanyāsa 272*a*, Āndhrapadyamulu 274*a*, Navaratnamālikā 276*a*, Dēvīstava 277*a*, Mallikārjunastava 279*a*;

Ēkāmrēśvarāṣṭaka 279b, Bilvāṣṭaka 280b, Pārvatīparamēśvarāṣṭaka 281a, Mahādēvīstōtra 281b, Dēvīkavaca 283a.

Complete.

Similar to the above.

This Nyāsa is intended to be a preliminary performance in relation to the repetition of the Śrīvidyāmantra.

**Beginning:**

अस्य श्रीविसर्गमातृकासरस्वतीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, विसर्गमातृका सरस्वती देवता ; हलो बीजानि, स्वराश्शक्तयः, बिन्दवः कीलकं, ममोपास्यमानश्रीविद्याङ्गत्वेन विसर्गमातृकान्यासे विनियोगः ।

**End:**

ओं ह्रीं श्रीं अः नमः—इति क्षः नमः पर्यन्तम् ॥

---

## No. 7248. वीणाश्यामलामन्त्रः.

## VĪṆĀŚYĀMALĀMANTRAḤ

Page, 1. Lines, 6 on page.

Begins on fol. 3b of the MS. described under No. 673; wherein it is included in the Ṣaḍāmnāya 1a in the list of other works.

Complete.

The repetition of this Mantra is intended to propitiate the goddess Śyāmalā, who is the same as Dēvī, and is believed to have the power to enable one to become proficient in the art of music.

**Beginning:**

अस्य श्रीवीणाश्यामलामन्त्रस्य मतङ्ग ऋषिः, अनुष्टुप् छन्दः, वीणाश्यामला देवता ; क्लीं बीजं, ह्रीं शक्तिः, श्रीं कीलकं, वीणाश्यामलाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

**End:**

मनुः—ऐं ह्रीं श्रीं ओं नमो भगवति वीणायै मम सङ्गीतविद्यां प्रयच्छ स्वाहा ॥

## No. 7249. वीणाश्यामलामन्त्रः.
## VĪṆĀŚYAMALĀMANTRAḤ.

**Page, 1.** Lines, 16 on a page.

Begins on fol. 229*a* of the MS. described under No. 124, wherein it is found in the Ṣaḍāmnāyamantra 228*b* in the list of other works.

Complete.

Similar to the above.

**Beginning:**

अस्य श्रीवीणाश्यामलामन्त्रस्य मतङ्ग ऋषिः, अनुष्टुप् छन्दः, वीणा देवता, वीणाश्यामलात्र—गः ।

**End:**

ओं नमो भगवति वि वीणायै मम सङ्गीतविद्यां प्रयच्छ स्वाहा । सङ्गीतश्यामलाम्बादिव्यश्रीपादुकां पूजयामि ॥

---

## No. 7250. वीरदशकमन्त्रः.
## VĪRADAŚAKAMANTRAḤ.

**Pages, 2.** Lines, 17 on a page.

Begins on fol. 5*b* of the MS. described under No. 5673, wherein this Mantra is found in the Āmnāyamantramālikā 1*a* in the list of other works.

Complete.

The repetition of this Mantra is considered to have the power to propitiate the following ten Vīra-bhairavas who are looked upon as Śākta-gurus:—

(1) Sṛṣṭivīrabhairava, (2) Sthitivīrabhairava, (3) Saṁhāravīrabhairava, (4) Raktavīrabhairava, (5) Yamavīrabhairava, (6) Mṛtyuvīrabhairava, (7) Bhadravīrabhairava, (8) Paramārkavīrabhairava, (9) Mārtāṇḍavīrabhairava, (10) Kālāgnirudrabhairava.

**Beginnnig:**

अस्य श्रीवीरदशकमन्त्रस्य परमानन्दभैरव ऋषिः, गायत्री छन्दः, श्रीदशवीरभैरवो देवता ; ओं बीजं, ह्रीं शक्तिः, हं (फं) कीलकं, मम श्रीवीरदशकप्रसादसिद्ध्यर्थे विनियोगः ।

**End:**

मनुः—

ह्रीं श्रीं फं फां फीं सृष्टिवीरभैरवश्री ५, स्थितिवीरभैरवश्री ५, संहारवीरभैरवश्री ५, . . . . . कालाग्निरुद्रवीरभैरवश्री ५, १४ ॥

---

## No. 7251. वीरदशकमन्त्रः.
## VĪRADAŚAKAMANTRAḤ.

**Pages, 2. Lines, 4 on a page.**

Begins on fol. 23*a* of the MS. described under No. 2848, wherein it is found in the Pūrvāmnayamantramālikā 16*a*.

Complete.

Same as the above.

---

## No. 7252. वीरदारणनारसिंहमालामन्त्रः.
## VĪRADĀRAṆANĀRASIṀHAMĀLĀMANTRAḤ.

**Page, 1. Lines, 6 on a page.**

Begins on fol. 1*b* of the MS. described under No. 5828, wherein this Mantra has been omitted to be included in the list of other works given therein.

Incomplete.

This Mantra praises, under various significant names, Nṛsiṁha who tore to pieces the valiant Hiraṇyakaśipu.

**Beginning:**

ओं नमो भगवते अघोरवीरदारणनारसिंह(ाय)रौद्राग्निज्वलितनेत्रत्रयाय प्रलयकालाग्निरुद्रावतारा(य)ज्वालानारसिंहा(य).

**End:**

ज्वालय ज्वालय महानारसिंह ख ख रञ्जित रञ्जित स्तम्भोत्स्फूर्जित धगधगित.

---

## No. 7253. वीरनृसिंहमन्त्रः.
## VĪRANṚSIṀHAMANTRAḤ.

**Pages, 12. Lines, 5 on a page.**

Begins on fol. 9*b* of the MS. described under No. 6387, wherein it is apparently wrongly stated as beginning on fol. 9*a* in the list of other works.

Complete as found in the Markandeya-purana.

This Mantra also praises Nṛsiṁha under various significant names.

**Beginning :**

अस्य श्रीवीरनृसिंहकेसरिप्रभापटलबलमन्त्रस्य अघोरनृसिंहकोटिसूर्य-प्रकाशस्य श्रीज्वालानृसिंहदिव्यमन्त्रो देवता, अनुष्टुप् छन्दः, ओं नमो भगवते दिव्यनृसिंहसुदर्शनाय कालाग्निरुद्राय हुङ्कृतविजयशौर्यमहाबल-पराक्रमाय सहस्रभुजशङ्खचक्रगदाधरवज्रदंष्ट्राकरालाय.

**End :**

ह्रां ह्रीं ह्रूं ह्रें ह्रैं ह्रों ह्रौं ह्रः क्ष्रां क्ष्रीं क्ष्रूं क्ष्रें क्ष्रैं क्ष्रों क्ष्रौं क्ष्रः ह्रां ह्रीं हुं फट् स्वाहा ॥

**Colophon :**

इति मार्कण्डेयपुराणे वीरनृसिंहमालामन्त्रः संपूर्णः ॥

---

No. 7254. वीरनृसिंहमन्त्रः.

VĪRANṚSIṀHAMANTRAḤ.

Pages, 18. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 5836.

Complete.

Same as the above.

---

No. 7255. वीरप्रचण्डहनुमन्मालामन्त्रः.

VĪRAPRACAṆḌAHANUMANMĀLĀMANTRAḤ.

Pages, 15. Lines, 6 on a page.

Begins on fol. 44b of the MS. described under No. 5822.

Complete.

This Mantra is addressed to Hanumat who is conceived as a very valiant and awe-inspiring deity.

**Beginning:**

वीरप्रचण्डहनुमन्मालामन्त्रस्य शौनक ऋषिः, अतिजगती छन्दः, हनुमान् रुद्रो देवता; रां बीजं, फट् शक्तिः, हुं कीलकं, श्रीहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः ।

**End:**

ओं ऐं क्लीं हुं ह्र ह्र ओं नमो भगवते वीरहनुमते

* * * *

ओं तपस्सत्यं ओं नमो भगवते रामदूतहनुमते वीर्यायास्त्राय फट् । भूर्भुवस्सुवरोमिति विमु(दि)क्बन्धः ॥

**Colophon:**

हनुमन्मालामन्त्रः समाप्तः ॥

---

No. **7256.** वीरप्रतापहनूमन्मन्त्रः.

VĪRAPRATĀPAHANŪMANMANTRAḤ.

**Page,** 1. Lines, 9 on a page.

Begins on fol. 67*a* of the MS. described under No. 21.

Complete.

Similar to the above. The repetition of this Mantra is considered to have the power to enable one to accomplish one's desires.

**Beginning:**

अस्य श्रीवीरप्रतापहनूमन्महामन्त्रस्य ईश्वरः ऋषिः, जगती छन्दः, श्रीवीरप्रतापहनुमान् देवता, ह्रीं बीजं, फट् शक्तिः, स्वाहा कीलकं, मम वीरप्रतापहनुम—विनियोगः ।

**End:**

मनुः—श्रीं वीरहनुमन्ताय प्रतिभटशिरश्छेदनाय शरणागतवज्रपञ्जर मम सर्वकार्याणि साधय साधय हुं फट् स्वाहा । गायत्री—तत्पुरुषाय विद्महे रामभक्ताय धीमहि । तन्नः प्लवङ्गमः प्रचोदयात् ॥

## No. 7257. वीरभद्रकवचः.
## VĪRABHADRAKAVACAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 153*a* of the MS. described under No. 5661.

Complete.

This Kavaca-mantra is addressed to Virabhadra; and its repetition is considered to have the power to secure protection to one from all possible dangers and to be helpful in the accomplishment of one's desires.

**Beginning:**

अस्य श्रीवीरभद्रकवचस्तोत्रमन्त्रस्य अत्रिभगवान् ऋषिः, अनुष्टुप् छन्दः, प्रसन्नवीरभद्रो देवता, मम इष्टकाम्यार्थसिद्ध्यर्थे जपे विनियोगः ।

*  *  *  *

वीरभद्रोऽग्रतः पातु पृष्ठं पातु पिनाकभृत् ।
वक्षो(दक्षे)दक्षक्रतुध्वंसी वामदेवस्तु वामतः ॥

**End:**

श्रीवीरभद्रकवचं भक्तानां वज्रपञ्जरम् ।
यः पठेच्छृणुयान्नित्यं वीरभद्रप्रसादतः ॥
अन्तश्च वीरो बहिरेव वीरः पार्श्वेश्च वीरः परितश्च वीरः ।
पृष्ठे च वीरः पुरतश्च वीरः सर्वत्र वीरस्सगणस्सहायः ॥

**Colophon:**

वीरभद्रकवचं संपूर्णम् ॥

---

## No. 7258. वीरभद्रकवचः.
## VĪRABHADRAKAVACAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 216*a* of the MS. described under No. 537.

Complete.

Similar to the above.

**Beginning:**

अस्य श्रीवीरभद्रकवचस्तोत्रमन्त्रस्य पशुपतिः ऋषिः, विराच्छन्दः, श्रीवीरभद्रो देवता ; ओं बीजं, ह्रीं शक्तिः, श्रीं कीलकं,

* * * *

श्री वीरभद्रकवचं पूर्वदिशं बन्धयामि—रुद्रविश्वेश्वराय नमः, आग्नेयदिशं बन्धयामि—विष्फुलिङ्गवीरभद्राय नमः ।

**End:**

क्षां क्षीं क्षूं क्षें क्षौं क्षौ क्षः त्रिशान्तवीरभद्राय त्रिशूलडमरुगपाशाङ्कुशधनुश्शरशस्त्रमुसलतोमरबाणाङ्कुशसकलशस्त्रास्त्रभूषणाय ओं ठं ठं ठं ठं हं हं हें हें हुं हुं फट् स्वाहा ॥

---

## No. 7259. वीरभद्रबडबानलमन्त्रः.
## VĪRABHADRABAḌABĀNALAMANTRAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 43*a* of the MS. described under No. 5836.

Complete.

The repetition of this Mantra is intended to propitiate Vīrabhadra conceived to be as terrible as the sub-marine fire known as Baḍabānala.

**Beginning:**

अस्य श्रीवीरभद्रबडबानलमन्त्रस्य ईशान ऋषिः, ककुत् छन्दः, श्रीवीरभद्रबडबानलरुद्रो देवता ; ह्रीं बीजं, स्वाहा शक्तिः, वषट् कीलकं, मम श्रीवीरभद्रप्रीत्यर्थे विनियोगः ।

**End:**

ओं नमो भगवते प्रळयकालवीरभद्राय कुरु कुरु फट् स्वाहा ॥

---

## No. 7260. वीरभद्रबडबानलमन्त्रः.
## VĪRABHADRABAḌABĀNALAMANTRAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 32*a* of the MS. described under No. 5422, wherein it has been wrongly given as Vīrabhadra-kavaca in the list of other works.

Complete.

Similar to the above.

The deity addressed here is Pralayakālavīrabhadra, and the repetition of this Mantra is held to be efficacious in safeguarding one's Mantras and in counteracting the effects of hostile Mantras, etc.

**Beginning:**

अस्य श्रीवीरभद्रवडबानलमहामन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः, श्रीप्रलयकालवीरभद्रो देवता ; ओं बीजं, ह्रां कीलकं, मम श्रीप्रलयकालवीरभद्रप्रसादसिद्ध्यर्थे जपे विनियोगः ।

**End:**

ओं नमो भगवते प्रलयकालवीरभद्रावताराय अनेककालनिर्णाशनाय दक्षयज्ञविनाशनाय आत्ममन्त्रयन्त्रतन्त्ररक्षणाय परमन्त्रपरयन्त्रपरतन्त्रप्रच्छेदनाय आमुखु आमुखु कह कह अनेकमुद्राय ह्रां ह्रीं ह्रूं ह्रें ह्रैं ह्रौं ह्रः फट् स्वाहा ॥

No. 7261. वीरभद्रवडबानलमन्त्रः.

VĪRABHADRABAḌABĀNALAMANTRAḤ.

Substance, palm-leaf. Size, 5⅜ × 1¼ inches. Pages, 7. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 5*a*. The other works herein are Indrākṣistōtra 1*a*, Śarabhasālvamantra 4*a*.

Complete.

Same as the above.

No. 7262. वीरभद्रवडबानलमन्त्रः.

VĪRABHADRABAḌABĀNALAMANTRAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 2*b* of the MS. described under No. 5828.

Complete.

This Mantra is addressed to Vīrabhadra conceived to be as terrible as the sub-marine fire known as Baḍabāgni; and its repetition is considered to be efficacious in bringing about the accomplishment of one's desires.

**Beginning:**

अस्य श्रीवीरभद्रबडबानलमन्त्रस्य विष्णुः ऋषि, अमृतगायत्री छन्दः, वीरभद्रेश्वरो देवता; हुं बीजं, ह्रीं शक्तिः, मम इष्टकाम्यार्थसिद्ध्यर्थे वीरेश्वरप्रीत्यर्थे जपे विनियोगः ।

**End:**

कम्पय कम्पय स ह्रीं हे वीरभद्र रुद्रे रौद्रावतार भक्तजनगरक्षणाय श्रीं हूं फट् स्वाहा ॥

---

No. **7263.** वीरभद्रबडबानलमालामन्त्रः.

VĪRABHADRABAḌABĀNALAMĀLĀMANTRAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 17*a* of the MS. described under No. 6393.

Incomplete.

Similar to the above.

**Beginning:**

ओं ह्रां अघोरवीरसाराय, ह्रीं अरुणप्रभाकरप्रज्वलितकुण्डलधराय, ह्रूं अष्टादशभुजकलकिङ्किणीकरवराय, ह्रौं शङ्खचक्रगदाधरत्रिशूलडमरुकधनुर्बाणहलमुसलपाशाङ्कुशकरवालकालसर्पघोरखट्वाङ्गकुलिशमुद्गरभिण्डिपालाद्यखिलायुधधराय, प्रलयकालाग्निरुद्ररौद्रवर्मज्योतिःप्रचण्डवीरभद्रबडबानलभैरवाय ।

**End:**

यं रं सं नं चतुर्वेदपरिपूर्णाय अनुच(म)मन्त्रमायावाद अभङ्गवेगगरुडवेगाय सर्वमन्त्रसर्वयन्त्रतन्त्ररक्षणाय सर्वपरमन्त्रयन्त्रतन्त्रच्छेदनाय.

---

No. **7264.** वीरभद्रबडबानलमालामन्त्रः.

VĪRABHADRABAḌABĀNALAMĀLĀMANTRAḤ.

Pages, 3. Lines, 18 on a page.

Begins on fol. 77*a* of the MS. described under No. 5673.

Complete.

Similar to the above.

Held to be efficacious in removing all kinds of evils and in securing the grace of Pralayakālavīrabhadra.

**Beginning :**

अस्य श्रीवीरभद्रवडवानलस्तोत्रमन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः, श्रीप्रलयकालवीरभद्रो देवता ; ओं बीजं, ह्रीं शक्तिः, स्वाहा कीलकं, मम सर्वोपद्रवप्रहरणार्थसिद्ध्यर्थे श्रीप्रलयकालवीरभद्रप्रीत्यर्थे जपे विनियोगः ।

**End :**

क्ष म र व र र यीं ओं नमो भगवते प्रलयकालवीरभद्रावताराय ह्रीं ह्रीं ह्रूं ह्रैं ह्रौं ह्रः फट् स्वाहा ॥

---

## No. 7265. वीरभद्रमन्त्रः.

## VĪRABHADRAMANTRAḤ.

**Page, 1. Lines, 27 on a page.**

Begins on fol. 239*a* of the MS. described under No. 581, wherein it is found in the Mantramālikā 229*a* in the list of other works.

Complete.

This Mantra is addressed to Vīrabhadra created by Śiva for destroying the sacrifice performed by Dakṣa.

**Beginning :**

अस्य श्रीवीरभद्रमन्त्रस्य उक्ता(नि) छन्दः (न्दांसि), . . . कृत्वा जपं करिष्ये । तत् मन्त्रं . . . मूलमन्त्रः—ओं नमो वीरभद्राय दक्षयज्ञविनाशनाय ।

**End :**

अज्ञनातनयमनोराञ्जिताय ह्रीं हुं फट् स्वाहा । अक्ष(र)लक्षपुरश्चरणं, मूलमन्त्रमेकाक्षरं जपेत् । दशांशहोमः ॥

## No. 7266. वीरभद्रमन्त्रः.
## VĪRABHADRAMANTRAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 91*b* of the MS. described under No. 5566, wherein it is wrongly stated as beginning on fol. 93 in the list of other works.

Complete.

Same as the above.

---

## No. 7267. वीरभद्रमन्त्रः.
## VĪRABHADRAMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 282*a* of the MS. described under No. 5477, wherein it is included in the Mantramālikā 273*a* given therein in the list of other works.

Complete.

Similar to the above. Held to be efficacious in removing various kinds of evils.

**Beginning** and **End**:

अस्य श्रीवीरभद्रमन्त्रस्य उक्तानि छन्दांसि, वामदेव ऋषिः, श्रीसदाशिवरुद्रो देवता; भद्रकाली बीजं, ह्रीं शक्तिः, ममारिष्टनिर्हरणार्थे विनियोगः । सर्वत्र रुद्रगायत्रीजपः ॥

---

## No. 7268. वीरभद्रमन्त्रः.
## VĪRABHADRAMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 45*b* of the MS. described under No. 2886.

Complete.

Similar to the above.

**Beginning**:

वीरभद्रस्य कालरुद्रः, जगती, वीरभद्रः, विं बी, हुं श, निमद्दे ।

**End:**

ब्रां खं फट् च रिपून् फट् च स्वाहान्तं मन्त्रमुच्यते ॥
अक्षरसहस्रं जपः ।

ठकारमध्ये परिलिख्य मन्त्रं बाह्येऽष्टपत्रेषु च हुं फडर्णम् ।
संवेष्ट्य पाशाङ्कुशमातृकार्णमाराधयेच्छ्चामलवीरभद्रम् ॥

आराधनानन्तरं मातृकावर्णपूर्वकं जपेत् ॥

---

No. **7269.** वीरभद्रमालामन्त्रः.

VĪRABHADRAMĀLĀMANTRAḤ.

**Page,** 1. **Lines,** 6 on a page.

Begins on fol. 53*b* of the MS. described under No. 5686.

Complete.

The repetition of this Mantra, which is also addressed to Vīrabhadra, is held to be efficacious in driving away and destroying evil spirits, etc.

**Beginning** and **End:**

रौद्रं रुद्रावतारं हुतवहनयनं व्योमकेशं सुदंष्ट्रं
श्यामाङ्गं भीमरूपं मिणि मिणि रभसं ज्वालमालाहुताङ्गम् ।
भूतप्रेताधिनाथं कदनकलुषिते खड्गचर्मे वहन्तं
वन्दे कोकैकवीरं त्रिभुवनमहितं वीरभद्रं नमामि ॥

ओं प्रलयकालभूतवेतालभैरवाय भूतप्रेतपिशाचोच्चाटनाय स्वमन्त्रयन्त्ररक्षणाय अष्टम(हा)भैरवाय शाकिनीः डाकिनीः छिन्धि छिन्धि सर्वशक्तीः छिन्धि छिन्धि ह्रीं ह्रीं ठं फट् स्वाहा ॥

---

No. **7270.** वीरभद्रमालामन्त्रः.

VĪRABHADRAMĀLĀMANTRAḤ.

**Page,** 1. **Lines,** 8 on a page.

Begins on fol. 20*a* of the MS. described under No. 6005.

Complete.

Similar to the above.

**Beginning:**

ओं वीरभद्राय द्र(द)क्षसंहरणाय आपदुद्धारणाय ईश्वरपुत्राय मल-यामिरु(द्रावतारा्य) नरसिंहसंहारणाय ओं फट् स्वाहा ।

**End:**

ल ल ल ल लि लि ओं अघोरभद्राय नमः ओं फट् स्वाहा ॥

---

No. **7271.** वीरभद्रमालामन्त्रः.

VĪRABHADRAMĀLĀMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 31*a* of the MS. described under No. 6005.

Complete.

Same as the above.

---

No. **7272.** वीरलक्ष्मीमन्त्रः.

VĪRALAKṢMĪMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 5*a* of the MS. described under No. 6157.

Incomplete.

This Mantra is in praise of Vīralakṣmī, described with various significant attributes.

**Beginning:**

ओं ओं ओं ज्वल ज्वल अघोरवीरमन्त्राङ्गे बीजसङ्कलितमहाग्नि-बीजाक्षरि सङ्कलितसकलमहद्बन्धनि अष्टदिग्बन्धनि नानादिग्बन्धनि आ-काशबन्धनि अन्तरिक्षबन्धनि अवनिबन्धनि.

**End:**

ह्रा ह्रूं ओं बीजाक्षरि रक्ताक्षि उग्ररूपि ओं ज्वालालक्ष्मि अघो-रवीरलक्ष्मि ॥

---

No. **7273.** वीरशरभमन्त्रः.

VĪRAŚARABHAMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 281*a* of the MS. described under No. 5477, wherein it is included in the Mantramālikā 273 given therein in the list of other works.

Complete.

This Mantra is addressed to Rudra or Śiva, who, according to the Purāṇas, once assumed a peculiar beast-and-bird form to subdue the Nṛsiṁha (man-lion) incarnation of Viṣṇu; and its repetition is believed to enable one to accomplish the four Puruṣārthas or aims of life, viz., Dharma, Artha, Kāma and Mōkṣa.

**Beginning:**

अस्य श्रीवीरशरभमहामन्त्रस्य त्रिपुरान्तक ऋषिः, अनुष्टुप् छन्दः, त्रिपुरसंहारमहारुद्रो देवता; मम चतुर्विधपुरुषार्थसिद्ध्यर्थे विनियोगः ।

**End:**

ओं नमो भगवते महावीरशरभाय द्विशिरसे द्विनेत्राय द्विपक्षाय सपुच्छायामिवर्णाय मृगविहङ्गरूपाय श्रीवीरशरभाय नमः ॥

पूर्ववज्जपहोमः ॥

---

## No. 7274. वीरशरभमन्त्रः.

## VĪRAŚARABHAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 112*b* of the MS. described under No. 119.

Complete.

Similar to the above.

**Beginning:**

ओं ह्रीं शं शां नमो भगवते वीरशरभाय ज्वालामालिने दीप्तदंष्ट्राय अग्निनेत्राय सर्वरक्षोघ्नाय तत्पुरुषाघोरवामदेवसद्योजातेशानाय.

**End:**

मृगविहङ्गमरूपाय श्रीवीरशरभेश्वराय नमः ॥

**Colophon:**

श्रीवीरशरभेश्वरस्तोत्रं सम्पूर्णम् ॥

---

## No. 7275. वीरशरभमन्त्रः.

## VĪRAŚARABHAMANTRAḤ.

Pages, 2. Lines, 27 on a page.

Begins on fol. 238*a* of the MS. described under No. 581, wherein it is found in the group of Mantras denoted by the

general name of Mantramālikā given therein in the list of other works.

Complete.

Similar to the above.

**Beginning:**

अस्य श्रीवीरशरभमहामन्त्रस्य अघोररूपो भगवानृषिः, अमृतगायत्री छन्दः, श्रीमहावीरशरभो देवता; श्वेतवर्ण, (उदात्तस्वरः,) (परमात्मक्षेत्रं, हं बीजं, हु शक्तिः, मं कीलकं, ममेष्टकाम्यार्थसिद्ध्यर्थं श्रीमहाशरभेश्वरप्रीत्यर्थं विनियोगः ।

**End:**

ओं भूर्भुवस्सुवः पतये मृत्युपतये अमृतं मे प्रयच्छ स्वाहा । शां · शं । ओं लक्षजपपुरश्चरणं कुर्यात् । दशांशहोमः ॥

---

## No. 7276. वीरशरभमन्त्रः.

## VĪRAŚARABHAMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 91*b* of the MS. described under No. 5566, wherein it is given as Mahāvīraśarabhamantra and is wrongly stated as beginning on fol. No. 92.

Complete.

Same as the above.

---

## No. 7277. वीरशरभमन्त्रः.

## VĪRAŚARABHAMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 280*b* of the MS. described under No. 5477, wherein it is found in the Mantramālikā 273*a* in the list of other works.

Complete.

Similar to the above.

**Beginning:**

अस्य श्रीवीरशरभमन्त्रस्य अघोररूपो भगवानृषिः, अमृतगायत्री छन्दः, श्रीमहावीरशरभो देवता; श्वेतवर्णः, उदात्तस्वरः, परमात्मक्षेत्रं,

हूं बीजं, हुं शक्तिः, मम कीलकं, ममेष्टकाम्यार्थसिद्ध्यर्थे श्रीमहावीरशरभेश्वरप्रीत्यर्थे विनियोगः ।

**End:**

कालाग्निरुद्राय कालकण्ठाय गरलसंहरणाय मृत्युपतये अमृतं मे प्रयच्छ स्वाहा । शां शं ॥

ओं लक्षजपं दशांशहोमः ॥

---

No. 7278. वीरशरभमालामन्त्रः.

VĪRAŚARABHAMĀLĀMANTRAH.

Pages, 2. Lines, 6 on a page.

Begins on fol. 211*a* of the MS. described under No. 537.

Complete.

This Mantra is in praise of Śiva under various significant names.

**Beginning:**

अस्य श्रीशरभसाल्वमन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः, श्रीवीरशरभसाल्ववीरभद्रो देवता, ओं बीजं, स्वाहा शक्तिः, जें कीलकं, श्रीशरभसाल्वप्रीत्यर्थे जपे विनियोगः ।

**End:**

नृसिंहशिरश्छेदनाय अरिष्टशत्रुसंहरणाय मृगपक्षिरूपाय जय जय श्रीमहाघोरवीरशरभसाल्वपक्षिराजाय हुं फट् स्वाहा ॥

---

No. 7279. वीरशरभमालामन्त्रः.

VĪRAŚARABHAMĀLĀMANTRAH.

Page, 1. Lines, 4 on a page.

Begins on fol. 271*a* of the MS. described under No. 537.

Complete.

Similar to the above.

**Beginning :**

भस्मोद्धूलितदेहानामापादतलमस्तकम् ।
रोमरोम भवेल्लिङ्गं तद्देहं शिवमुच्यते ॥

* * * *

ओन्नमो भगवते वीरशरभाय तीक्ष्णदंष्ट्राकरालाय त्रिनेत्राय ज्वल ज्वल प्रज्वलय.

**End :**

शत्रुसंहाराय प्रळयकालवीरशरभाय असाध्यसाध्याय ह्रां ह्रीं ह्रूं हुं फट् स्वाहा ॥

---

## No. 7280. वीरहनुमन्मालामन्त्रः.
## VĪRAHANUMANMĀLĀMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 21*a* of the MS. described under No. 2886.

Complete.

This Mantra is in praise of Hanumat under various significant names. Its repetition is held to have the power to safeguard one from the evils that may come from the various quarters as also from the evils caused by evil spirits.

**Beginning :**

ओन्नमो भगवते महावीरप्रतापमहाबलपराक्रमाक्रान्ताय वज्रदेहस्वरूपाय वैदेहीहृदयशोकविनाशनाय अञ्जनागर्भसंभूताय ।

**End :**

सर्वग्रहबन्धनाय सर्वदिग्बन्धनाय ओन्नमो भगवते हुं फट् स्वाहा । वीरहनूमते हुं फट् स्वाहा ॥

---

## No. 7281. वीरहनुमन्मालामन्त्रः.
## VĪRAHANUMANMĀLĀMANTRAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 5828.

Incomplete.

Similar to the above.

Held to be efficacious in the accomplishment of one's desires, in driving off all kinds of evil spirits, and in removing various kinds of fever.

**Beginning :**

अस्य श्री(वीर)हनुमन्ताघोरप्रलयज्वालारौद्रविजयविद्रुमवीरहनुमन्तासाध्यसाधनाघोरास्त्रप्रयोगमूलमन्त्रस्य वामदेव ऋषिः, गायत्रीच्छन्दः, ओं बीजं, स्वाहा शक्तिः, हूं कीलकं, श्रीवीरहनुमान्देवता, इष्टकाम्यार्थफलसिद्ध्यर्थे जपे विनियोगः ।

**End :**

ओं नमो भगवते प्रतापहनूमते भूतप्रेतपिशाचमण्डलदानवदैत्यब्रह्मराक्षसवेतालमण्डल . . . उच्चाटनाय तद्वत् ग्रहज्वरमाहेश्वरज्वरत्रिरात्रज्वरचातु[र]र्थिकज्वर.

---

## No. 7282. वीरहनुमन्मालामन्त्रः.
## VĪRAHANUMANMĀLĀMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 1*b* of the MS. described under No. 5828, wherein this Mantra has been omitted to be included in the list of other works given therein.

Complete.

Similar to the above.

Held to be efficacious in enabling a person to free himself from bondage of all kinds.

**Beginning** and **End :**

ओं नमो भगवते वीरहनुमन्ताय हं हां ह्रिं ह्रीं हूं . . . . तापिपराक्रमाय एहि एहि मम बन्धमोचनाय . . . . . . . हुं फट् स्वाहा ॥

**Colophon :**

वीरहनुमन्तं(न्मालामन्त्रः) ॥ पुरश्चरणम् १० ॥

## No. 7283. वीरहनुमन्मालामन्त्रः.

## VĪRAHANUMANMĀLĀMANTRAḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 67a of the MS. described under No. 21, wherein it is given as Vīrapratāpahanumanmālāmantra in the list of other works.

Complete.

Similar to the above.

Held to be efficacious in the accomplishment of one's desires.

**Beginning :**

ओं नमो (वीर)हनूमन्त प्रकटपराक्रमाक्रान्तदशदिङ्मण्डल यशोवितानधवलीकृतजगत्त्रित्य वज्रदेह रुद्रांशसंभव ।

**End :**

लक्ष्मणप्राणसंरक्षण कुमारब्रह्मचारिन् रामप्रियतम दशास्यदर्पदलन मम सर्वकार्याणि साधय साधय हुं फट् स्वाहा ॥

---

## No. 7284. वीरावलीमन्त्रः.

## VĪRĀVALĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 233a of the MS. described under No. 124, wherein it is found in the Ṣaḍāmnāyamantra 228b given therein in the list of other works.

Complete.

This Mantra is addressed to the five following groups of attendants of the goddess Śakti. They are considered also as Śākta-gurus:—

(1) Brahmavīrāvalī, (2) Viṣṇuvīrāvalī, (3) Rudravīrāvalī, (4) Īśvaravīrāvalī, (5) Sadāśivavīrāvalī.

**Beginning :**

अस्य श्रीवीरावलीमन्त्रस्य ब्रह्मविष्णुरुद्रेश्वरसदाशिव(?) ऋषयः, गायत्री छन्दः, वीरावली देवता ; लं वं रं यं हं बीजानि, सरस्वती महालक्ष्मी

पार्वती उन्मनी मनोन्मनी शक्तयः, सो हं कीलक, मम श्रीवीराव-लीप्र—गः ।

**End :**

ऐं ह्रीं श्रीं ऐं क्लीं सौः ब्रह्मवीरावलीदिव्यश्री—मः, विष्णुवीरा-वलीदि, रुद्रवीरावलीदि, ईश्वरवीरावलीदि, सदाशिववीरावलीदिव्यश्री—मः, नवमुद्रावीरावलीयुक्ताय द्विसहस्रदेवतासहिताय ओड्याणपीठदिव्य-श्री—नः ॥

---

## No. 7285. वीरावलीमन्त्रः.
## VĪRĀVALĪMANTRAH.

Pages, 2. Lines, 18 on a page.

Begins on fol. 7*a* of the MS. described under No. 5673, wherein it is found in the Āmnāyamantramālikā 1*a* in the list of other works.

Complete

Similar to the above.

See under the previous number for the beginning.

**End :**

सदाशिववीरावलीश्रीपादुकां पूजयामि नमः । इत्युत्तराम्नायगुरून् हृदये मत(न)श्चक्रे च पूजयेत् ॥

---

## No. 7286. वीरावलीमन्त्रः.
## VĪRĀVALĪMANTRAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 26*b* of the MS. described under No. 2848, wherein it is found in the Pūrvāmnāyamantramālikā 16*a* given therein in the list of other works.

Complete

Similar to the above.

**Beginning :**

पञ्चवीरावलीमन्त्रस्य ब्रह्मविष्णुरुद्रेश्वरसदाशिवा ऋषयः, वीरावली देवता; लं वं रं यं हं बीजं, वाणी महालक्ष्मीः उमा पार्वती मनो-न्मनी शक्तिः, सो हं कीलकं, विनियोगः ।

**End:**

ऐं ह्रीं श्रीं ऐं क्लीं सौः ब्रह्मवीरावली श्रीविष्णुरुद्रेश्वरसदाशिवाः ॥

---

No. 7287. वीरावलीमन्त्रः.

VĪRAVALĪMANTRAH.

Page, 1. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 673.

Complete.

Similar to the above.

**Beginning:**

अस्य श्रीपञ्चवीरावलीमन्त्रस्य ब्रह्मविष्णुरुद्रेश्वरसदाशिव(1) ऋषि(षय):, गायत्र्यादीनि छन्दांसि, पञ्चवीरावली देवता; लं वं यं रं हं बीजानि, वाणी लक्ष्मीः उमा भवानी मनोन्मनी देवता शक्तयः, सो हं कीलकं, मम वीरावलीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

**End:**

रुद्रवीरावलीश्री, ईश्वरवीरावलीश्रीपा, सदाशिववीरावलीश्री, पञ्चवीरावलीश्रीपा—नमः ।

---

No. 7288. वेणुनादगोपालमन्त्रः.

VEṆUNĀDAGŌPĀLAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 46*b* of the MS. described under No. 5885.

Complete.

This Mantra is addressed to Kṛṣṇa, conceived as a cowherd playing on a flute; and its repetition is intended to please him.

**Beginning:**

अस्य श्रीवेणुनादगोपालमन्त्रस्य नारद ऋषिः, गायत्री छन्दः, श्रीवेणुनादगोपालो देवता, क्लां बीजं, क्लीं शक्तिः, क्लूं कीलकं, श्रीवेणुनादगोपालप्रीत्यर्थे जपे विनियोगः ।

**End:**

मनुः—

क्लां क्लीं क्लूं कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा ॥

---

No. 7289. वेणुश्यामलामन्त्रः.

VĒṆUŚYAMALĀMANTRAḤ.

**Pages,** 2. Lines, 10 on a page.

Begins on fol. 229*a* of the MS. described under No. 124, wherein it is found in the Sadāmnāyamantra 228*b* given therein in the list of other works.

Complete.

The repetition of this Mantra addressed to Vēṇuśyāmalā, who is conceived as the presiding deity of the flute, is held to have the power to enable one to compose literary works of value.

**Beginning:**

अस्य श्रीवेणुश्यामलामन्त्रस्य मतङ्गभगवानृषिः, अनुष्टुप् छन्दः, वेणुर्देवता, वेणुश्यामलाप्र—गः ।

**End:**

ओं नमो भगवते वें वेणवे मम साहित्यविद्यां प्रयच्छ स्वाहा । साहित्यविद्याम्बादिव्यश्रीपादुकां पूजयामि नमः ॥

---

No. 7290. वेदव्यासगायत्रीमन्त्रः.

VĒDAVYĀSAGĀYATRĪMANTRAḤ.

**Pages,** 2. Lines, 8 on a page.

Begins on fol. 14*a* of the MS. described under No. 5786, wherein it is wrongly stated as beginning on fol. 14*b* in the list of other works.

Complete.

This is a Gāyatrīmantra as appertaining to Vēdavyāsa; and its repetition is held to secure his favour. For what is meant by Gāyatrī, see under No. 7027.

**Beginning:**

गुरुनमस्कारः—

ओं पूर्णज्ञानाय विद्महे पूर्णानन्दाय धीमहि ।

तन्नो व्यासः प्रचोदयात् । इति प्राणायामः (१२). पूर्णज्ञानेत्यादिषडङ्गन्यासः ।

* * * *

अस्य श्रीवेदव्यासगायत्रीमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीवेदव्यासो देवता; श्रीवेदव्यासप्रेरणया श्रीवेदव्यासप्रीत्यर्थे जपे विनियोगः ।

**End:**

ओं पूर्णज्ञानाय विद्महे पूर्णानन्दाय धीमहि । तन्नो व्यासः प्रचोदयात् । इति जपः । उपसंहारः पूर्ववत् ॥

**Colophon:**

व्यासगायत्री ॥

---

## No. 7291. वेदव्यासमन्त्रः.

## VEDAVYĀSAMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 325*b* of the MS. described under No. 5477, wherein it is found in the Mantramalikā 273*a* in the list of other works given therein.

Complete.

This Mantra is also addressed to Vēdavyāsa.

**Beginning:**

अस्य श्रीवेदव्यासमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीवेदव्यासो देवता, व्यासायेति षडङ्गन्यासः ।

**End:**

ओं वेदव्यासाय पूर्णज्ञानाय पूर्णानन्दाय स्वाहा । इति ॥

## No. 7292. वेदव्यासाष्टाक्षरमन्त्रः.

## VĒDAVYĀSĀṢṬĀKṢARAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 14*a* of the MS. described under No. 5786.

Complete.

Similar to the above. This Mantra consists of eight syllables when the syllable Ōm is left out of account.

**Beginning:**

गुरुनमस्कारः—

ओं वां वेदव्यासाय नमः इति प्राणायामः १२. पूर्णज्ञानेत्यादिन्यासः ।

अस्य श्रीवेदव्यासमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीवेदव्यासो देवता; श्रीवेदव्यासप्रेरणया वेदव्यासप्रीत्यर्थे जपे विनियोगः ।

**End:**

वेदव्यासाष्टाक्षरमहामन्त्रजपं करिष्ये ।

ओं वां वेदव्यासाय नमः — इति जपः । उपसंहारः पूर्ववत् ॥

---

## No. 7293. वेदव्यासैकाक्षरमन्त्रः.

## VĒDAVYĀSAIKĀKṢARAMANTRAH

Pages, 2. Lines, 8 on a page.

Begins on fol. 14*b* of the MS. described under No. 5786, wherein it is wrongly stated as Vēdavyāsanavākṣarī in the list of other works.

Complete.

This Mantra consists of the single syllable व्यां, which is held to denote Vēdavyāsa.

**Beginning :**

गुरुनमस्कारः —

व्यां इति प्राणायामः (१२). पूर्णज्ञानेत्यादिन्यासः ।

अस्य श्रीएकाक्षरवेदव्यासमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, वेदव्यासो देवता; वेदव्यासप्रेरणया वेदव्यासप्रीत्यर्थे जपे विनियोगः ।

**End :**

एकाक्षरवेदव्यासमहामन्त्रजपं करिष्ये—ओं व्यां ओं—इति जपः, उपसंहारः पूर्ववत् ॥

---

## No. 7294. व्याधिमन्त्रः.
## VYĀDHIMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 44*b* of the MS. described under No. 4886, wherein it is found in the Ākāśabhairavakalpa 38*a* given therein in the list of other works.

Complete.

The name of the work, of which this apparently forms the 37th chapter, seems to be Ākāśabhairavakalpa.

The repetition of this Mantra addressed to Śiva is held to have the power to enable one to make one's enemies suffer from various kinds of diseases.

**Beginning :**

व्याधिमन्त्रस्य वीरभद्र ऋषिः, अनुष्टुप् छन्दः, महाव्याधिकरशिवः, व्यां बीजं, हुं शक्तिः,

विनियोगोऽनिशं भक्ताः शत्रुनाशाय पीडने ।

**End :**

यत्साध्यं लिखितं व्याधेः तत्तद्व्याधिर्भविष्यति ।

तद्रोगं रिपुराश्रित्य सुभगेऽनुभवेद्ध्रुवम् ॥

**Colophon :**

इति सप्तत्रिंशोऽध्यायः ॥

No. **7295.** व्याहृतिमन्त्रः.

VYÂHṚTIMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 5*b* of the MS. described under No. 5786.

Complete.

This Mantra consists of the Mahāvyāhṛtis भूः, भुवः, सुवः, and their combination, these being generally repeated with the Praṇava. Its repetition is intended to propitiate Viṣṇu.

**Beginning:**

अथ व्याहृतिमन्त्रः—

ओं भूः ओं भुवः ओं सुवः ओं भूर्भुवस्सुवः इति प्राणायामः १२.

* * * *

अस्य श्रीव्याहृतिमन्त्रस्य प्रजापतिः ऋषिः, गायत्री छन्दः, परमात्मा श्रीहरिर्देवता ; श्रीहरिप्रेरणया श्रीहरिप्रीत्यर्थे जपे विनियोगः ।

**End:**

यथाशक्ति नियमेन व्याहृतिमन्त्रजपङ्करिष्ये—ओं भूः ओं भुवः ओं सुवः ओं भूर्भवस्सुवः—इति जपः । उपसंहारः पूर्ववत् ॥

---

No. 7296. शकटासुरसंहारकगोपालमन्त्रः.

ŚAKAṬĀSURASAṀHĀRAKAGŌPĀLAMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 44*b* of the MS. described under No. 5885.

Complete.

This Mantra is addressed to Kṛṣṇa conceived as the cowherd, who, while lying in the cradle playfully, killed with a kick a certain Asura or demon, who, under the orders of Kaṁsa, assumed the form of a cart with a view to crush to death under its wheels the child Kṛṣṇa.

**Beginning:**

अस्य श्रीशकटासुरसंहारकगोपालमन्त्रस्य नारद ऋषिः, अनुष्टुप् छन्दः, शकटासुरसंहारकगोपालो देवता ; श्री बीजं, हुं शक्तिः, फट् कीलकं, शकटासुरसंहारकगोपालप्रीत्यर्थे जपे विपियोगः ।

**End:**

ओं श्री कृष्णाय हुं फट् स्वाहा ॥

---

No. 7297. शक्तिगणपतिमन्त्रः,

ŚAKTIGAṆAPATIMANTRAḤ.

Pages, 2. Lines, 12 on a page.

Begins on fol. 19*a*. The other works contained herein and referred to under No. 547 are Parabrahmavidyamantra 1*a*, Kāmakalānyāsa 1*a* and 28*b*, Tripurasundarimālāmantra 1*b*, Tripurasundarikavaca 4*a*, Tripurasundaryaṣṭōttaraśata 8*a*, Dēvyupaniṣad Pādukāmantra 13*a*, Gurumantra 13*b*, Mēdhādakṣiṇāmūrtimantra 14*a*, Mēdhādakṣiṇāmūrtikavaca 14*b*, Pañcadaśākṣarimantra 15*b*, Ṣōḍaśākṣarimahātripurasundarimantra 16*a*, Rājarājēśvarikavaca 16*b*, Bhūtaśuddhi 17*a*, Garuḍapañcākṣarimantra 19*b*, Bālāparamēśvarimantra 19*b*, Pañcākṣarimālāmantra 20*a*, Tripurasundarimālāmantra 21*a*, Śrīvidyāvyākhyāna 24*a*, Sādhakasandyāvandana 31*a*, Śrīcakrākṣaravinyāsa 32*a*.

Complete.

This Mantra is addressed to Śaktigaṇapati, i.e., to Vināyaka as associated with his wife Vallabhā; and its repetition is held to have the power to enable one to accomplish one's desires. The syllable Hrim—ह्रीं—in the Mantra is the mystic symbol denoting Śakti.

**Beginning:**

अस्य श्रीशक्तिगणपतिमहामन्त्रस्य गणक ऋषिः, नृचिद्गायत्री छन्दः, श्रीशक्तिगणपतिर्देवता. गं बीजं, गीं शक्तिः, गूं कीलकं, सर्वाभीष्टसिद्ध्यर्थे शक्तिगणपतिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

**End:**

ओं श्री ह्रीं क्लीं ग्लौं गं गणपते वरवरद सर्वजनं मे वशमानय स्वाहा ॥

---

No. 7298. शक्तिगणपतिमन्त्रः.

ŚAKTIGAṆAPATIMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 291*a* of the MS. described under No. 5477, wherein it is included in the Mantramālikā 273*a* in the list of other works given therein.

Complete.

Similar to the above.

**Beginning:**

अस्य श्रीशक्तिगणपतिमन्त्रस्य गणक ऋषिः, निचृद्गायत्री छन्दः, शक्तिगणपतिर्देवता, गं बीजं, ह्रीं शक्तिः, ममेष्टकाम्यार्थसिद्ध्यर्थे जपे विनियोगः ।

**End:**

ह्रीं ग्लौं महागणपतये नमः, पञ्चलक्षं पुनश्चरणम् ॥

---

No. 7299. शक्तिगणपतिमन्त्रः.

ŚAKTIGAṆAPATIMANTRAḤ.

Page, 1. Lines, 27 on a page.

Begins on fol. 246*b* of the MS. described under No. 581, wherein it is found in the Mantramālikā 229*a* given therein in the list of other works.

Complete.

Similar to the above.

**Beginning:**

(अस्य श्रीशक्तिगणपतिमन्त्रस्य) गणक ऋषिः, निचृद्गायत्री छन्दः, श्रीशक्तिगणपतिर्देवता, गं बीजं, ह्रीं शक्तिः, ममेष्टकाम्यार्थसिद्ध्यर्थे विनियोगः ।

**End:**

ह्रीं गौं महागणपतये नमः ।

पञ्चलक्षं जपेन्मन्त्रं पुरश्चरणसिद्धये ॥

---

No. **7300.** शक्तिगणपतिमन्त्रः.

ŚAKTIGAṆAPATIMANTRAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 96*a* of the MS. described under No. 5566, wherein it has been omitted to be included in the list of other works given therein.

Complete.

Same as the above.

---

No. **7301.** शक्तिन्यासः.

ŚAKTINYĀSAḤ.

Pages, 4. Lines, 10 on a page.

Begins on fol. 191*a* of the MS. described under No. 124.

Complete.

On details connected with the ceremonial touching of certain parts of the body, while repeating at the same time the appropriate Śaktimantras; this kind of Nyāsa is held to be a necessary preliminary to the repetition of the Śrīvidyāmantra.

**Beginning:**

अथ शक्तिन्यासः—तत्र प्रथमं जगच्छून्याकारं निरालम्बं ध्यात्वा, ह्रुं पृथिव्यै नम इति स्वासनाधः पृथिवीं संपूज्य, स्वासनं वामहस्तेन स्पृशन् भुवनेश्वरीबीजं सप्तवारं जपित्वा, ऐं ह्रीं श्रीं जयायै विजयायै ४ जैत्र्यै ४ अजितायै ४ अपराजितायै सङ्गमायै रम्भायै इति स्वासने सप्तशक्तिं संपूज्य, मूलविद्यया प्राणायामत्रयं कृत्वा, अस्य श्रीमहाशक्तिन्यासस्य परमशिव ऋषिः, अतिजगती छन्दः, श्रीपराशक्तिर्देवता, ऐं बीजं, श्रीं शक्तिः, सौः कीलकं, श्रीविद्याङ्गत्वेन महाशक्तिन्यासे विनियोगः ।

**End:**

इति सप्तधा संपूज्य, धूपदीपौ नै(नि)वेद्य तस्मिन् त्रैपुरे देहे ऐं ह्रीं सौः इति वनिताक्षोभकरीं महाकामकलां ध्यायेत् ॥

**Colophon:**

इति शक्तिन्यासविधिः समाप्तः ॥

---

No. 7302. शक्तिपञ्चाक्षरीमहामन्त्रः.

ŚAKTIPAÑCĀKṢARĪMAHĀMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 51*a* of the MS. described under No. 235.

Complete.

The repetition of this Mantra is intended to propitiate Śiva as associated with Śakti.

**Beginning:**

अस्य श्रीशक्तिपञ्चाक्षरीमहामन्त्रस्य सद्योजात ऋषिः, जगती छन्दः, श्रीशक्तिपञ्चाक्षरी देवता; ह्रां बीजं, ह्रीं शक्तिः, ह्रूं कीलकं, श्रीशक्तिपञ्चाक्षरीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

**End:**

ओं ह्रीं नमश्शिवाय ॥

---

No. 7303. शक्तिपञ्चाक्षरीमहामन्त्रः.

ŚAKTIPAÑCĀKṢARĪMAHĀMANTRAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 9*a* of the MS. described under No. 6518.

Complete.

Similar to the above.

**Beginning:**

अस्य श्रीशक्तिपञ्च(ाक्षरी)महामन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः, उमामहेश्वरो देवता; ओं बीजं, ह्रीं शक्तिः, नम इति कीलकं, श्रीउमामहेश्वरप्रसादसिद्ध्यर्थे जपे विनियोगः ।

**End:**

ओं ह्रीं ह्रौं नमश्शिवाय, ह्रौं ह्रीं ओं उमामहेश्वराय नमः, श्री-महामायायै नमः, ओं अम्बिकायै नमः, शिवकाम्यै नमः, परमगुरुभ्यो नमः ॥

---

## No. 7304. शक्तिप्रत्यङ्गिरामालामन्त्रः.

## ŚAKTIPRATYAṄGIRĀMĀLĀMANTRAḤ.

Pages, 11. Lines, 5 on a page.

Begins on fol. 81a of the MS. described under No. 29, wherein it is given as Prātyangiramantra in the list of other works

Complete as found in the Rudrayāmala.

This Mantra is addressed to the goddess Śaktipratyaṅgirā, and is considered to be of use in causing the destruction of one's enemies. The authorship of this Mantra is attributed to Śiva.

**Beginning:**

अस्य श्रीशक्तिप्रत्यङ्गिराउग्रकृत्यादेवीमहामन्त्रस्य प्रत्यङ्गिरा ऋषयः, त्रिष्टुप् छन्दः, श्रीशक्तिप्रत्यङ्गिरा उग्रकृत्या देवता, ह्रीं बीजं, क्रों शक्तिः, श्रीं कीलकं, मम सर्वशत्रुसंहरणार्थे . . . . . श्रीप्रत्यङ्गिरामहादेवीप्रसादसिद्ध्यर्थे प्रत्यङ्गिरामन्त्रजपं करिष्ये ।

**End:**

ओं ह्रीं ई ग्लौं श्रीं सौं ऐं हुं नमः कृष्णवाससे शतसहस्रसिंह-वदने अष्टादशभुजे . . . . . . . . .

ओं सर्वसंहारकारिणि महाप्रत्यङ्गिरे सर्वशात्रवोन्मूलिनि स्वाहा ॥

**Colophon:**

इति श्रीरुद्रयामले शूलपाणिविरचितायां(तः) शक्तिप्रत्यङ्गिरास्तवराजं-(जः)सम्पूर्णम्(ः) ॥

---

## No. 7305. शक्तिप्रत्यङ्गिरामालामन्त्रः.

## ŚAKTIPRATYAṄGIRĀMĀLĀMANTRAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 93a of the MS. described under No. 537.

Complete as found in Rudrayāmala.

Similar to the above.

This manuscript is stated to have been transcribed by Mājeṭi Śarvēśalinga.

**Beginning:**

अस्य श्रीशक्तिप्रत्यङ्गिराउग्रकृत्यादेवीमहामन्त्रस्य प्रत्यङ्गिरा ऋषयः, त्रिष्टुप् छन्दः, श्रीशक्तिपत्यङ्गिरा उग्रकृत्या देवी देवता; ह्रीं बीजं, क्रों शक्तिः, श्रीं कीलकं, मम सर्वशत्रुसंहारणार्थे परमन्त्रपरयन्त्रपरकर्मपरविद्याद्याभिचारिकविच्छेदनार्थे . . . . . प्रत्यङ्गिरामन्त्रजपं करिष्ये ।

**End:**

शत्रून् सन्तापय सन्तापय हुं फट् स्वाहा । ओं सर्वसंहारकारिणि महाप्रत्यङ्गिरे सर्वशास्त्र(त्र)वोन्मूलिनि स्वाहा ॥

**Colophon:**

इति श्रीरुद्रयामले शूलपाणिविरचितायां(तः) शक्तिप्रत्यङ्गिरास्तवराजं(जः)सम्पूर्णम्(ः) ॥

* * * *

भद्रं नो अभिपातु ते नमः । शां ॥

**Colophon:**

प्रत्यङ्गिरास्तवराजं सम्पूर्णम् ॥

---

## No. 7306. शक्तिमन्त्रः.
## ŚAKTIMANTRAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 82*b* of the MS. described under No. 21.

Complete.

This Mantra is addressed to the goddess Śakti.

**Beginning:**

ओन्नमो भगवति सिद्धपरञ्ज्योतिः रुद्राणि सर्वाणि सर्वमङ्गळा सर्वग्रहभयङ्करी महावीरशक्तिशङ्करवल्लभे ।

**End:**

रौद्ररणवीरभद्रेश्वरि ओं हुं फट् स्वाहा ॥

No. 7307. शक्तिमातृकान्यासः.
ŚAKTIMĀTṚKĀNYĀSAḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 193*a* of the MS. described under No. 124, wherein it is found in Daśavidhamātṛkānyāsa 192*a* in the list of other works.

Complete.

On the ceremonial touching of certain parts of the body, while repeating the series of Mantra-formulas formed by introducing ह्रीं before and after each of the successive letters of the alphabet.

**Beginning:**

अथ शक्तिमातृकान्यासः—

अस्य श्रीशक्तिमातृकान्यासस्य वसिष्ठ ऋषिः, सुतश्छन्दः, शक्तिर्देवता, हं बीजं, ईं शक्तिः, ब्रह्मा बीजं, माया शक्तिः, शिवो बीजं, बुद्धिशक्तिः, उदानो बीजं, सुषुम्ना शक्तिः, रेफः कीलकं, श्रीशक्तिमातृकान्यासे विनियोगः ।

**End:**

ह्रीं अं नमः ह्रीं इत्यादि क्षान्तं न्यसेत् ॥

**Colophon:**

इति शक्तिमातृकान्यासः ॥

---

No. 7308. शङ्खसुवर्णयक्षिणीमन्त्रः.
ŚAṄKHASUVARṆAYAKṢIṆĪMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 297*b* of the MS. described under No. 5477, wherein it is found in the Mantramālikā 273*a* in the list of other works given therein.

Complete.

This Mantra is addressed to a certain Yakṣiṇī, who is conceived as wearing a garland of conch shells. It seems that a fire-offering followed by the repetition of this Mantra is understood to have the power to enable a man to become wealthy.

**Beginning:**

ऋष्यादिकं पूर्ववत् । ओं शङ्खधारिणि शङ्खाभरणि द्रां द्री क्री ब्ली श्री स्वाहा ।

**End:**

त्रिकोणं होमकुण्डं दशांशं होमं कल्पप्रकारेण जुहुयात् । इति ॥

---

No. 7309. शङ्खसुवर्णयक्षिणीमन्त्रः.

SAṄKHASUVARṆAYAKṢIṆĪMANTRAḤ.

Page, 1. Lines, 27 on a page.

Begins on fol. 251*b* of the MS. described under No. 581, wherein it is found in the Mantramālikā 229*a* in the list of other works.

Complete.

Similar to the above.

**Beginning:**

ओं शङ्खधारिणि शङ्खाभरणे द्रां द्री क्री ब्लें श्री स्वाहा ।

**End:**

षडङ्गं मायाबीजं होमप्रकारेण ध्यानम् । त्रिकोणकुण्डे दशांशहोमं कल्पप्रकारेण जुहुयात् ॥

---

No. 7310. शङ्खसुवर्णयक्षिणीमन्त्रः.

SAṄKHASUVARṆAYAKṢIṆĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 99*a* of the MS. described under No. 5566, wherein it has been omitted to be included in the list of other works given therein.

Complete.

Same as the above.

## No. 7311. शत्रुविध्वंसिनीशूलिनीमन्त्रः.

### ŚATRUVIDHVAṀSINĪŚŪLINĪMANTRAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 47a of the MS. described under No. 21.

Complete.

This Mantra is addressed to the goddess Śūlinī, so called because she is conceived as having a Śūla in her hand; and its repetition is held to be efficacious in the destruction of one's enemies and in the accomplishment of one's desires.

**Beginning:**

अस्य श्रीशत्रुविध्वंसिनीमन्त्रस्य ज्वलत्पावक ऋषिः, शत्रुविध्वंसिनी त्रिशूलिनी देवता, मम शत्रुविनाशनार्थे जपे विनियोगः ।

मूलम् – शत्रुविध्वंसिनी रौद्री त्रिशिरा रक्तलोचना ।
अग्निज्वाला रक्तमुखी घोरदंष्ट्री त्रिशूलिनी ॥

**End:**

इद(मं)स्तवं जपेन्नित्यं विजयं शत्रुनाशनम् ।
सहस्रं त्रिदिनं कृत्वा कार्यसिद्धिर्न संशयः ॥

---

## No. 7312. शत्रुसंहारकगोपालमन्त्रः.

### ŚATRUSAṀHĀRAKAGOPĀLAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 50a of the MS. described under No. 5885.

Complete.

The repetition of this Mantra addressed to Kṛṣṇa is considered to have the power to enable one to destroy one's enemies.

**Beginning:**

अस्य श्रीशत्रुसंहारकगोपालमन्त्रस्य नारद ऋषिः, बृहती छन्दः, शत्रुसंहारकगोपालो(देवता), ग्लौं बीजं, ह्स्रौं शक्तिः, क्लीं कीलकं, शत्रुसंहारकगोपालप्रीत्यर्थे जपे विनियोगः ।

**End:**

ओं ग्लौं ह्स्रौं क्लीं कृष्णाय ज्वल हुं फट् स्वाहा ॥

## No. 7313. शनिकवचम्.
### ŚANIKAVACAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 46 of the MS. described under No. 5945.

Complete; as found in the Skāndapurāṇa.

This Mantra is in praise of the planet Saturn; and its repetition is considered to have the power to remove all kinds of evils and to confer on one prosperity and protection.

**Beginning:**

श्रृणुध्वं मुनयस्सर्वे शनिपीडाहरं शुभम् ।
कवचं ग्रहराजस्य शनेरिदमनुत्तमम् ॥
कवचं देवतावासः कवचं वज्रपञ्जरम् ।
सर्वपीडाहरश्श्रीमान् सर्वसौभाग्यदायकः ॥
शिरश्शनैश्चरः पातु फालं वै सूर्यसम्भवः ।
